षण्मुख ध्यान श्लोकाः

षण्मुख ध्यान श्लोकाः

षडाननं त्रिषण्णेत्रं विद्रुमाभं द्विपादकं |
खड्गाभयगदाशक्तिखेटं दक्षिणबाहुभिः || 1 ||

वरपद्मधनुःशूलवज्रान् वामेन धारिणं |
वज्रप्रवाळवैडूर्यप्रत्युप्तमकुटान्वितं || 2 ||

पीतांबरविभूषाढ्यं दिव्यगंधानुलेपनं |
रत्नाद्याभरणैर्युक्तं प्रसन्नवदनान्वितं || 3 ||

मयूरेशसमासीनं सर्वाभरणभूषितं |
गुहं षोडशवेतानं षण्मुखं च विभावयेत् || 4 ||

– पूर्वमुख ध्यानं –
वचद्भुवं शशांकाभं एकवक्त्रं त्रिलोचनं |
चतुर्भुजसमायुक्तं वराभयसमन्वितं ||
सव्ये चान्ये दंडयुतं ऊरूहस्तं च वामके |
रुद्राक्षमालाभरणं भस्मपुंड्रांकितं क्रमात् ||
पुरश्चूडासमायुक्तं मौंजीकौपीनधारिणं |
अक्षमालासमायुक्तं पादुकाद्वयभूषितं ||
काषायवस्त्रसंयुक्तं वचद्भुवं विभावयेत् ||

– दक्षिणमुख ध्यानं –
जगद्भूतं भृंगवर्णं एकवक्त्रं वराभयं |
शक्तिशूलसमायुक्तं करंडमकुटान्वितं |
मयुरेशसमासीनं भावये च विशेषतः ||

– नैर्ऋतिमुख ध्यानं –
विश्वभुवं च रक्ताभं एकवक्त्रं त्रिलोचनं |
वराभयकरोपेतं खड्गखेटकसंयुतं |
मयूरवाहनारूढं भावयेत्सततं मुदा ||

– पश्चिममुख ध्यानं –

शुक्लवर्णं ब्रह्मभुवं एकवक्त्रं त्रिलोचनं |
वराभयसमायुक्तं घंटानादसमन्वितं |
मयूरेशसमासीनं भावये च विशेषतः | |

– उत्तरमुख ध्यानं –

हेमवर्णं चाग्निभुवं त्रिनेत्रं चैकवक्त्रकं |
वराभयसमायुक्तं गदाध्वजसमन्वितं |
मयूरवाहनारूढं भावयेद्वह्निसंभवं | |

– ईशानमुख ध्यानं –

बृहद्भुवं च स्फटिकवर्णाभं चैकवक्त्रकं |
वराभयसमायुक्तं त्रिनेत्रं यज्ञसूत्रकं |
मयूरेशसमासीनं बृहद्भुवं विभावयेत् | |

ॐ नमो भगवते सुब्रह्मण्याय |